# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा - शास्त्री (SEM-1) | प्रश्नपत्रम् – ६ | |
|---|---|---|
| विषयः - सर्वदर्शनम् | (CC-1.1.2 NEW) | गुणाः - ७० |
| दिनाङ्कः - २०/१२/२०१८ | सन्दर्भग्रन्थः सांख्यतत्त्वकौमुदी | समयः -०२.०० तः ०५.०० |

**प्रथमान्विति:**

**प्रश्नः १ कयोश्चिद् द्वयोः कारिकयोः व्याख्यां लिखत ।** **(१०)**

(१) *दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।*
*तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥*

(२) *अतिदूरात् सामीप्यात् इन्द्रियघातान्मनोऽनवस्थानात् ।*
*सौक्ष्म्याद् व्यवधानाद् अभिभवात् समानाभिहाराच्च ॥*

(३) *प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानाख्यातम् ।*
*तल्लिङ्गलिङ्गपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥*

**प्रश्नः २ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **(१०)**

(१) *सांख्यदर्शनानुसारं पञ्चविंशतितत्त्वानां विवेचनं कुरुत ।*

(२) *सत्कार्यवादं यथाग्रन्थं प्रतिपादयत ।*

**द्वितीयान्विति:**

**प्रश्नः ३ कयोश्चिद् द्वयोः कारिकयोः व्याख्यां लिखत ।** **(१०)**

(१) *त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।*
*व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥*

(२) *जननमरणकरणानां प्रतिनियमात् अयुगपत्प्रवृत्तेश्च ।*
*पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥*

(३) *तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।*
*कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥*

**प्रश्नः ४ कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** **(१०)**

(१) *व्यक्ताव्यक्तयोः साधर्म्यवैधर्म्यं प्रतिपादयत ।*

(२) *सांख्यमतानुसारं पुरुषस्य बहुत्वं सयुक्ति निरूपयत ।*

## तृतीयान्वितिः

**प्रश्नः ५ कयोश्चिाद् द्वयोः कारिकयोः व्याख्या कार्या ।** **( १० )**

( १ ) *पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।*
*पङ्ग्वन्धवद् उभयोरपि संयोगः तत्कृतः सर्गः ॥*

( २ ) *बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।*
*वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ॥*

( ३ ) *अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।*
*सात्त्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम् ॥*

**प्रश्नः ६ कस्यचिद् एकस्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

( १ ) *सांख्यमतानुसारं सर्गस्य उत्पत्तिः कथं भवति इति यथाग्रन्थं लिखत ।*

( २ ) *भारतीयदर्शनेषु सांख्यदर्शनस्य वैशिष्ट्यं वर्णयत ।*

## चतुर्थान्वितिः

**प्रश्नः ७ केषाञ्चन दशानां प्रश्नानाम् अतिलघूत्तरात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) सांख्यतत्त्वकौमुदीकारः कः ?*

*(२) अजा का ?*

*(३) किं नाम मानसं दुःखम् ?*

*(४) सांख्यमते कतिविधं प्रमाणं स्वीक्रियते ? किं तत् ?*

*(५) लघु प्रकाशकं किम् अस्ति ?*

*(६) महदादि कस्य कार्यम् अस्ति ?*

*(७) किं नाम अनुमानम् ?*

*(८) विषादात्मकः गुणः कः ?*

*(९) साक्षी द्रष्टा मध्यस्थः कः ?*

*(१०) बुद्धेः सात्त्विकधर्माः कति सन्ति ? के च ते ?*

*(११) किं नाम अहङ्कारः ?*

*(१२) कर्मेन्द्रियाणि कतिः कानि च तानि ?*

*(१३) सांख्यमते चेतनः कः अस्ति ?*

*(१४) दुःखं कतिविधम् ? किं तत् ?*

*(१५) सांख्यकारिकाकारः कः ?*